ॐ

1. जय गणेश जय गणेश जय गणेश देवा,
माता आदि पराशक्ति पिता महादेवा ॥०

2. हाथ में त्रिशूल सोहे चार भुजाधारी,
मस्तक प चन्द्र सोहे मूषक की सवारी ॥०

3. पान चढे फूल चढे और चढे मेवा,
लड्डुवन का भोग लगे संत करे सेवा ॥०

4. अन्धन को नेत्र देत कोढ़िन को काया,
बन्दिन को पुत्र देत निर्धन को माया ॥०॥

=====०००=====

1. गुरू के चरण में शीश झुकाले,
सद्गुरू के चरण में शीश झुकाले।
जीवन अपना सफल बना रे ॥ गुरू०

2. गुरू बिन ज्ञान कहां से पाओं,
राह में भूल भटक ना जाओं,
गुरू सेवा कर गुरू गुण गा ले॥
गुरू के० . . . . . .

3. जीवन का कच्छु लाभ उठा ले,
नाम नवक में बिडके प्राणी,
भव सागर से पार उत्तर ले॥
गुरू०
सत् गुरू के चरण मे . . . . . .

1. भज रे, भज रे . . . भज रे,
भज रे मानस गुरू चरणम्।
दुस्तर भव सागर तरनम्॥
भज रे० . . . . . .

2. शीतल चरणं, कोमल चरणम्,
सुन्दर चरणं, मम गुरू चरणं॥ भज०

3. मञ्जुल चरणं मम गुरु चरणम्,
मम गुरु चरणं शरणं शरणम्॥
भज रे० - - - - - -

4. भागवतामृत हर्षित सुजनम्,
भवभय सिन्धु प्लवपद नयनम्॥
भज रे० - - - - -

5. श्री शुक नारद सनक समानम्,
श्रीधर नाम रसामृत पानम्॥ भज रे०

6. राग द्वेष रहित् अन्तः करणम्,
राम दास परि पूरित चरणम॥
भज रे मानस गुरु चरणम्

—o—o—

1. अम्बा ललिते! माम् पालय पर शिव
वनिते।
सौभाग्य दायनि ललिते, माम् ..... ||

2. अम्बा सीते! परमानन्द विलसिते,
गुरु भक्त जनौघवृते पर तत्त्व-
सुधारस मिलिते। अम्बा प्रकाशिनी
दुरित विनाशिनी निगम् निवासिनी
विजय विलासिनि भगवति ललिते।|
अम्बा ललिते ..... ||

---

3. अम्बा बाले! कुंकुम रेखांकित
भाले,
परिपालित सुरमुनि जाले,
भवपाश विमोचन मूले, हिम् गिरि
तनय कमल सुनिलये सुमहित
सदये, सुन्दर हृदये ललिते....

[illegible]

4. अम्बा रामे! घन सुन्दर मेघ-श्यामे,
निर्लई-कृत हरतनु वामे, सकला-
गम विदितो धामे। अम्बा
वामचारिनि काम विहारिनी
साम विनोदिनि सोम शेखरि
ललिते। अम्बा०..॥

5. अम्बा तुंगे! बिंमालक परिलसदंगे,
परिपुरित करूणापांगे, सुर-
शास्त्रव गर्व विभंगे। अम्बा।
संग रहित मुनि पुंगवनुत पदे
मंगल शुभकरि सर्व मंगले,
ललिते।अम्बा० ....॥

6. अम्बा कुन्दे! परि वन्दित
सनक स्कन्दे।
वन्दारू महीसुर वृन्दे,

-7-

ओ श्री भगवान्। हमारे हरि
कीर्तन में।
ओ आओ श्री भगवान हमारे
हरि कीर्तन में ॥

प भी आना संग राधा जी को
लाना,
कर रास रचाना, हमारे हरि०..॥

प भी आना, ग्वाल बालों को भी
लाना।
कर मखन चुराना हमारे हरि कीर्तन
मे ॥०

प भी आना, संग गय्यन को
लाना।
कर दूध बहाना, हमारे हरि
कीर्तन मे ॥०

प भी आना संग गोपियों को
लाना।

लाकर नाच नचाना, हमारे हरि
कीर्तन में ॥०

6. आप भी आना संग बांसुरी को
लाना।
लाकर बंसी बजाना, हमारे हरि
कीर्तन मे ॥०

7. आप भी आना संग कृपा भी लाना,
भक्तों पर कृपा बरसाना, हमारे हरि
कीर्तन मे ॥

———o——o———

श्री रामः शरणं समस्त जगतां,
रामं नमामीश्वरम् ।
रामेण रचितं त्रिलोकम खिलं,
रामाय तस्मै नमः ॥
रामात सर्वमिदम जगत समुदितं
रामस्य दासोऽस्म्यहम् ।
रामे मे रतिरस्तु राम नहिमाम्,
मोक्तुं भवानर्हति ॥

श्री गुरवे नमः

1. सरस्वति! त्वं भव सावधाना, तथा मम स्वान्तवचःक्रियासु।
विकल्पधूली कलितां यथा त्वां, कुर्यां विशुद्धां नु गुरुस्त-
वेन॥

2. रुषा कामं तु दहते, कामं भक्ताय यच्छते।
नमः शिवाय गुरवे, गुरवे शिव रूपिणे॥

3. सारूप्य वैरूप्यमयैर्वचोभि-
र्न वर्णनं पूज्य तवास्ति युक्तम्।
सर्वात्मकः सर्व विलक्षणश्च,
भवन्निभो भाति यतो भवान्मे॥

4. दासीकृतानन्त सहस्रशक्तिः,
शक्तिः प्रदत्ता गुरुणा तु मह्यम्।
तयापि तं स्तोतुमहं विजिह्व-
स्तत्पादपद्मस्मरणं करोमि॥

5. यः संस्मृतस्तन्मयतां ददानो-
विस्फारयन् शक्तिमसीममन्तः।
द्राग् बोधयन् विश्वमयं स्वरूपं,
विश्वात्मतां यच्छति तं नतोऽस्मि॥

६. कालत्रयातीतमिदं मदीयं नित्यं विभुं व्याप
द्वितीय
संदर्शितं येन वपुर्विभातं तं नौमि देव
गुरुमेव शंभु

७. विभावयन्नापि न यस्य साम्यं
कदापि कुत्रापि च कोऽपि विद्वान् ।
कथं गुरुः सो ह्युपमाविहीनः
प्रवर्त्यतामेतु हृदि स्थितोऽपि ॥

८. अकलितसुखदुःखं सर्वभोगैरूपेतं,
विगलितभवपाशं भावनातीतरूपम्
बहुविधधृतरूपं ध्यानयोगाद्यगम्यं
भजमम गुरुपादं पूर्णकाम्छो भव त्वम्

९. गुरुरेव परं ज्ञानं गुरुरेव परं तपः
गुरुरेव परो मोक्षो गुरुं तस्माद्भजाम्यहम्

१०. गुरुरेको जगत्यस्मिन् सर्वसंसारतापह
लक्ष्मणेन्दुः कलापूर्णो राजतां जनत
हृदि ॥

11. विभासितानन्तसहस्रभानुः
प्रकाशितो लक्ष्मण शब्दतेन।
बिभ्रन् वपुर्बुद्ध बिभर्ति विश्वं
यो मे गुरुर्भारतभाग्यभूतः॥

12. निर्धूतदेहादिमितप्रमातृ-
भावो, भवो भाति मितस्वरूपः।
देवोऽद्वयो यो द्वयतामुपेतो
विश्वं चिदानन्दमयं विधातुम्॥

13. तस्मै त्वया वाच्यमिदं मदीयं
मूर्ध्ना च वाचा मनसा प्रदत्तम्।
नमोऽद्यजस्रं भवतापहन्त्रे
देवाय दिव्याद्भुतशक्तिधर्त्रे॥

14. काङ्क्षन्तो बहवः सुरासुरनराः प्राप्ता न यद् दुर्लभं-
नत्वा यद् यतयो गताश्च परमं शैवं पदं शाश्वतम्।
यल्लब्ध्वाऽस्म्यहमेव मानमहतां मान्यो महेशोऽपि तन्-
नौमि स्तौमि जपाम्युपैमि सततं ज्योतिर्गुरोरङ्घ्रिम्॥

नित्यं निरावरणमप्रतिमस्वरूपं
शम्भुं स्वभावविमलं हृदि संस्फुरन्तम् ।
पश्यन्ति नैव कृतिनः सुकृतैर्भवन्तं-
यावद् भवान् न गुरुरूपतया विभाति ॥

नेच्छामि किञ्चित् स्पृहयामि नाहं-
देहस्थितिञ्चापि न कामयेऽहम् ।
त्वद्दासभावैककृताभिलाषी -
ध्याये सदा त्वां कुरु चाप्तकामम् ॥

अनादिमायाविवशीकृता वयं
भवन्तमात्मानमनन्तमव्ययम् ।
गवेषयन्तो विषयेष्वितस्ततो,
विखिद्यमाना भवता सुखीकृताः ॥

विद्याधिपाय भवते भवतापहन्त्रे
वैराग्यबोधघनमूर्तिजुषे नमो नः ।
कुर्वस्मदीय समुपासनयाऽनया त्वं,
प्रीतः प्रभो! सपदि पूर्णमनोरथान् नः ॥

19. मनोवाग्विषयातीते दुर्लभेऽतिमनोहरे
त्वत्पादपंकजे प्रीतिरस्त्वस्माकं मनोरथः।
वाचश्चतुर्विधा-यास्तु कारणं परमं भवान्
स, कथं स्तूयतेऽस्माभिर्वैखरी वर्ण
गुम्फनैः॥

20. सर्वेश्वरः सर्वमयस्त्वमेकस्-
त्वत्तोविभिन्नं नहि नामरूपम्।
जानामि पश्यामि तथाप्यवाप्त
त्वां कामये नाथ पुरः समक्षम्॥

21. अध्यारोपित मातृमानकलनाद्-
भूताद् भूताभासको-,
योऽनन्तोमित मातृतामपि भजन-
नेकोऽस्त्यभिन्नोऽद्वयः।
सोऽस्माकं गुरुलक्ष्मणो विजयते
देवो वपुष्मानिव,
भिन्नाभासवियोगयोगनिरतो
देवः स्वतन्त्रः शिवः॥

22. चेतो! जडेषु विषमेषु विषोपमेषु
सद्योऽह्यनित्य विषयेषु रतिं विहाय।
सौन्दर्यसीम्नि परमामृत धामनि त्वं
सर्वात्मके किल गुरौ प्रियतां बधान॥

23. व्याप्यत्वं व्यापकत्वं च महत्त्वमणुतापि च।
दूरत्वञ्च समीपत्वमस्मिन्भाति महेश्वरे॥

24. मान्यः स एको भुवि मादृशानां
ध्येयः स एवास्ति च सर्वदा नः।
श्लाघ्यश्च पूज्यश्च विमर्शनीयो-
नान्योऽस्ति कश्चिन्ननु लक्ष्मणान्नः॥

25. लेभे न लब्धा लभते न देहं
लोके न जीवः पितरौ विना हि।
नूनं तथाऽप्नोति निजं स्वरूपं
सत्यं शिवं नैव गुरूं विनापि॥

26. क्षिणोति दुःखं विधुनोति पापं
दधाति सौख्यं यदहृष्ट पूर्वम्।
करोत्यभिन्नं निजतो जनान् यस् -
तमेव सेवे गुरुलक्ष्मणाख्यम्॥

27. ज्ञानक्रियारूपमयीञ्च शक्तिं
श्रीशारिकां श्रीप्रभयाभिरामाम्।
वन्दे महामोह विनाशदक्षां -
सिद्धैः सदासेवितपादपद्माम्॥

28. कायेनवाचामनसाभिवन्दे
स शक्तिकं श्रीगुरुराजमेकम्।
यदाशिषाहं शिवतामवाप्तः
पश्यामि विश्वं निजरूपभूतम्॥

इति श्री आचार्य रामेश्वर झा
निर्मितानि पद्यानि॥

सर्वभावमय भाव मण्डले, सर्व शक्तिमय शक्ति वर्हिषि
जुह्वतो मम समोऽस्ति कोऽपरो, विश्वमेधमय यज्ञ याजिनः॥

ये यौष्माके शासनमार्गे कृतदीक्षाः
संगच्छन्तो मोहवशाद् व्रीतिपत्तिम् ।
नूनं तेषां नास्ति भवद्भानुनियोगः
संकोचः किं सूर्यकरैस्तामरसानाम् ।

3. ज्ञातज्ञेय ध्यातृपदस्था अपि सन्तो
ये त्वन्मार्गात्कापथगास्तेऽपि न सम्यक्।।
प्रायस्तेषां लौङ्गिक बुद्ध्यादि समुत्थो
मिथ्याबोधः सर्पवसादीपज कल्पः॥

4. यस्माद् विद्धं सूतकमुख्येन नु ताम्रं
तद्धाद् भूयः स्वां प्रकृतिं नो समुपेयात् ।
नो तैः पीतं भूतलसंस्थैरमृतं त-
द्येषां तृट्क्षुद्दुःखविबाधाः पुनरस्मिन्॥

२ (ॐ नमः शिवाय)

सोम नाथ